मिति चेत् न मञ्चाः क्रोशन्तीत्यत्र तेन विनापि पुरुषे तात्पर्य्यात् गङ्गादिपदं मत्स्यादिपरं मुख्यतीरपरञ्च स्यात् अविनाभावस्य तदेव स्यात् मुख्ये बाधके सतीति चेत्। तर्हि मुख्यार्थपरतैव न स्यात्। नापि गच्छ गच्छसीत्यत्र गमनाभावपरत्वम्। उच्यते। तत्प्रयोजनकत्वं तत्परत्वं तदर्थप्रतीतिः प्रवृत्तिनिवृत्ती च। प्रयोजनत्वञ्च न साध्यत्वं अन्योन्याश्रयात् नापि प्रतिपाद्ये स्वविषयत्वं यस्य यदिच्छाविषयस्तं प्रति तत्परत्वापत्तेः तदर्थसाध्यसाधनत्वे नेच्छानियम इति चेत्। न इह धूम इत्यत्र अन्यज्ञाप्यवह्नेन साध्यस्य वस्तुभेदतया वाक्यभेदप्रसङ्गात् पुमिच्छाया नियन्तुमशक्यत्वात्। किन्तु प्रतिपादकेच्छाविषयत्वं तत्परत्वं यः शब्दो वक्त्रा यदिच्छया प्रयुक्तः स तत्परः सा च प्रतिपाद्यधीः प्रवृत्तिनिवृत्तिविषययोः तत्परत्वं नानार्थात् श्लिष्टादनेकपदार्थान्वितैकक्रियापरान्मुख्यलाक्षणिकपदादनावृत्त्या क्रमेणानेकार्थज्ञानं, न त्वेकदैव सकृदर्थपरत्वनियमेनैकस्योच्चारणेऽनेकपरत्वाभावादिति सकलतान्त्रिकैकवाक्यतया वदन्ति तन्न ब्रूमः। अनेकार्थप्रतीतीच्छयैकसमुच्चारणं भवत्येव पुमिच्छाया नियन्तुमशक्यत्वात् यदि तदुच्चारणमेकार्थपरं तदा आवृत्तिरपि न स्यात् तात्पर्य्यनिर्वाहार्थमावृत्तिकल्पनात्। अन्यथैकपरेऽपि तदापत्तेः। अतएव तदुच्चारणस्योभयपरतायामावृत्तिकल्पनं, तस्मात्तुल्यवदनेकार्थोपस्थितौ तात्पर्य्यादिज्ञाने युगपदनेकान्वयबोधो भवत्येव सामग्र्यास्तुल्यत्वात् प्रथममेकस्यान्वयबोधो न तदन्यस्येति नियन्तुमशक्यत्वाच्च”।

“आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्यं परिकीर्त्तितम्” भाषा० “तात्पर्य्यं निर्वक्ति वक्तुरिच्छेति। यदि तात्पर्य्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात्। न च तात्पर्य्यग्राहकप्रकरणादीनामेव शाब्दबोधे कारणत्वमस्त्विति। तात्पर्य्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्य्यज्ञानमेव लाघवात् कारणमस्तु। इत्थञ्च वेदस्थलेऽपि तात्पर्य्यज्ञानार्थमीश्वरः कल्प्यते। न च तत्राध्यापकतात्पर्य्यज्ञानं कारणमिति वाच्यम् सर्गादावध्यापकाभावात् न च प्रलय एव नास्तीति कुतः सर्गादिरिति वाच्यम् प्रलयस्यागमप्रतिपाद्यत्वात्। इत्थञ्च शुकवाक्येऽपि ईश्वरीयतात्पर्य्यज्ञानं कारणम्। विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्य्यस्य ज्ञानं कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्य्यज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्य्यज्ञानं शाब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः। मुक्ता० “ननु माभूदाप्तोक्तत्वस्य निश्चयानुरोधेन सिद्धसाधनं तात्पर्य्यस्य तु स्यात् तन्निश्चयस्यान्वयधीहेतुत्वात् अन्यथा घटकर्म्मत्वादिपरत्वाभावस्य घटकर्म्मत्वाद्यन्यमात्रपरत्वस्य वा निश्चयेऽपि घटमित्यादिवाक्यात् कर्म्मत्वं घटीयमित्याद्यन्वयबोधापत्तेरिति चेन्न कर्म्मताधर्म्मिकघटाद्यन्वयधीपरत्वाभावनिश्चयदशायां प्रमेयत्वादिप्रकारेण घटकर्म्मत्वादिपरत्वस्य निश्चयेऽपि घटीयं कर्म्मत्वमित्यन्वयमतेरनुत्पत्त्या कर्म्मताधर्म्मिकघटान्वयबोधपरत्वप्रकारकनिश्चयत्वेनैव तात्पर्य्यधियस्तस्यां कारणत्वेन वाक्यार्थस्य तत्रानिवेशात्। वस्तुतः समानानुपूर्व्वीकस्यैव वाक्यान्तरस्य तस्यैव वा कालान्तरमन्तर्भाव्य घटीयकर्म्मत्वादिपरत्वनिश्चयसत्त्वेऽपि श्रूयमाणवाक्यव्यक्ताविदानीमन्तर्भावेण तत्परत्वस्यानिश्चयेऽभावे वा घटीयं कर्म्मत्वमित्याद्यन्वयमतेरनुत्पादाद्विशिष्यैव तत्तद्वाक्यव्यक्तिधर्म्मिकस्य घटकर्म्मत्वादिपरत्वनिश्चयस्य तत्तदन्वयबोधहेतुत्वमुपेयं तथा च तत्तद्धेतुभूतानां प्रकरणज्ञानाभिधानामेव विज्ञानव्यक्तीनान्तथात्वमुचितम् अवश्यं क्लृप्तपूर्ववर्त्तिताकत्वात्। अतएव सैन्धवमानय इत्यादावपि लवणपरत्वधीर्न लवणाद्यन्वयबुद्धौ हेतुः किन्तु तदर्जकत्वेनाभिमतं भोजनादिप्रकरणस्य प्रतिसन्धानमिति न्यायसिद्धान्तः” शब्द० प्र०।

**तादर्थ्य** न० तदर्थ+चतुर्व० ष्यञ्। तदुद्देश्यकत्वे।

**तादात्म्य** न० तदात्मनो भावः ष्यञ्। अभेदे तदात्मशब्दे दृश्यम्।

**तादीत्ना** अव्य० तदानीम्+पृषो०। तदानीमित्यर्थे “आत् सूर्य्यं जनयन् द्यामुषासं तादीत्ना शत्रुम्” ऋ० १।३२।४ “तादीत्ना तदानीमित्यस्य पृषोदरादित्वाद्वर्णविपर्य्ययः।

**तादृक्ष** त्रि० तस्येव दर्शनमस्य तद्+दृश–क्स सर्वनामटेरात्त्वम् उप० स०। तत्तुल्यदर्शने।

**तादृश** त्रि० तस्येव दर्शनमस्य तद्+दृश–ट उप० स०। तत्तुल्यदर्शने “क्व तद्विधं प्रेम पतिश्च तादृशः” कुमा० “निजुह्नुवे तादृशमेव वृंहितम्” माघः। स्त्रियां ङीप्। “यादृशी भावना यस्य सिद्धिर्भवति तादृशी” उद्भटः।

**तादृश्** त्रि० तस्येव दर्शनमस्य तद्+दृश–क्विप् उप० स०। तत्तुल्ये “तादृग्गुणा सा भवति समुद्रेणेव निम्नगा”